# Shri Kataksha Shodashi

# श्रीकटाक्षषोडशी

## Document Information

Text title : Shri Katakshashodashi 06 03

File name : kaTAkShaShoDashI.itx

Category : vishhnu, ShoDasha, krishna

Location : doc_vishhnu

Author : Kavichandra

Proofread by : Saritha Sangameswaran

Description/comments : prakIrNastotrANi Stotrarnavah Ed. T.Chandrasekharan 1961 From stotrArNavaH 06-03

Latest update : March 27, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

Shri Kataksha Shodashi

# श्रीकटाक्षषोडशी

सम्भावयन् विधिशिवौ सकृदिन्दिरायाः
वक्त्रारविन्दपरिरम्भकरः सुरस्पृक् ।
मज्जन् मुहुः स्वशरणेषु निपत्य मग्नो
दीनेषु रक्षतु स मां भगवत्कटाक्षः ॥ १॥

मज्जन् दयामयसुधाम्बुनिधौ जगत्या-
मत्यादरेण परिरभ्य करीन्द्रमार्तम् ।
कुम्भीरमाप परुषाकृतिमेव रोषात्
यः पातु जातु विशदो भगवत्कटाक्षः ॥ २॥

रक्तः स्वयं सलिलराशिसुतास्यबिम्ब-
सम्भावनासु शुचिरार्तजनप्रसादे ।
अम्भोजनिःसरदलिप्रकारनुकारी
चित्रास्चिरादवतु मां भगवत्कटाक्षः ॥ ३॥

दुःखप्रवाहपरिणाहविगाहनोद्यत्-
सन्तापमादृशविवर्जनदुर्यशोभिः ।
संलिप्तमूर्तिरिव मेचकरोचिरव्या-
दव्याजरक्षितजगद्भगवत्कटाक्षः ॥ ४॥

पद्मालयावदनमण्डलनेत्रयुग्म-
च्छद्मोल्लसद्विकचपद्मविहारलुब्धः ।
मुग्धो मधुव्रतसमूह इव प्रसर्पन्
श्रेयः समर्पयतु मे भगवत्कटाक्षः ॥ ५॥

पातानुभावपरिपावितपातकाध्व-
पान्थाधिकाररहितान्तकददर्शिन्ताधिः ।
दुःखाभिभूततरभूतचयानुभूतौ
दायस्तनोतु कुशलं भगवत्कटाक्षः ॥ ६॥

मन्दारमुख्यसुरवृक्षवदान्यभावः
सन्ध्यास्फुटीकृतबहुप्रवणार्थिवन्द्यः ।
निष्कामभक्तजनसात्कृतनित्यधामा
कामाय सम्भवतु मे भगवत्कटाक्षः ॥ ७॥

न्यस्तात्मभारभरणादरभाव्यमान-
वृत्तिप्रवृत्तिपरतन्त्र इव प्रवृत्तिः ।
सद्वृत्तिधूर्तविषयाधिकतोपरोष-
संलक्षितो भगवतोऽवतु मां कटाक्षः ॥ ८॥

दुर्वारमारशरवार इवातिधीर-
वाराङ्गनाहृदयदुर्जयधैर्यभेदी ।
सत्पक्षयोगविहितद्रुतगत्यनिन्द्यो
निन्द्यां मतिं हरतु मे स हरेः कटाक्षः ॥ ९॥

निर्व्याजदृष्टिकरुणामृतवृष्टिहृष्ट-
पुष्टत्रिलोकगतकोकविलोकनीयः ।
दिव्याम्बुवाह इव सक्षणरुग्विलासः
तापत्रयं हरतु मे स हरेः कटाक्षः ॥ १०॥

यस्मिन् समुल्लसति कामधुगल्पदो वा
कल्पद्रुरल्पफलपुष्प इवास्तु कल्पः ।
चिन्तामणिर्मणिगणैर्गणनीयभाग्यः
कामं स पूरयतु मे भगवत्कटाक्षः ॥ ११॥

अन्तर्निरन्तरवलद्विमलानुकम्पा-
संस्पर्धमानमहिमानुगृहीतभक्तः ।
अग्राध्वजाग्रदतिवेललसत्तितिक्षः
क्षेमं तनोतु नितरां भगवत्कटाक्षः ॥ १२॥

इन्दीवरोदरमनोहरमन्दिरान्त-
र्वास्तव्यकान्तिरमणीपरिरभ्यमाणः ।
कश्चिद्विपश्चिदनुभूतमहाप्रसादः
सीदन्तमुद्धरतु मां भगवत्कटाक्षः ॥ १३॥

ध्यायान्निकायनिरपायकृपौधयुक्तो

मुक्तोपभुक्तमहिमामृतसिन्धुबिन्दुः ।
कामप्रकामफलदाननिदानकल्प-
वृक्षोपमः फलतु मे भगवत्कटाक्षः ॥ १४॥

यस्यानुकूल्यबहुमूल्यमनोज्ञरत्न-
भूषाविभूषिततनुस्तनुजाम्बुराशेः ।
भूरप्यभूदतुलसौभगयोगयोग्या
भूयात् स भूरिविभवाय विभोः कटाक्षः ॥ १५॥

इन्दीवरैरिव किरन् रुचिभिः समन्तात्
वृन्दावनान्तरमनन्तगुणास्पदं यः ।
आनन्दयत्यनुदिनं व्रजसुन्दरीणां
चेतांसि मेऽस्तु सुखदः स हरेः कटाक्षः ॥ १६॥

कटाक्षषोडशी से कविचन्द्रविनिर्मिता ।
कलेव कृष्णाचन्द्रस्य करोतु जगतां मुदम् ॥ १७॥

इति श्रीकटाक्षषोडशी सम्पूर्णा ।
भगवत्कटाक्षषोडशी

Proofread by Saritha Sangameswaran

*Shri Kataksha Shodashi*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*